॥ श्रीः ॥

व्रजजीवन प्राच्यभारती ग्रन्थमाला

४१

श्रीमद्यास्कमुनिप्रणीतं

( कश्यपप्रजापतिकृत-निघण्टुभाष्यरूपम् )

# निरुक्तम्

श्रीमद्भगवद्दुर्गाचार्यकृत-ऋज्वर्थाख्यव्याख्यानुसारिण्या

म० म० पण्डित श्रीमुकुन्दझाशर्मणा

पटिआला-राजपण्डितेन

कृतया निरुक्तविवृत्या टिप्पण्यादिभिः समुपेतं संशोधितं च

**चौखम्बा संस्कृत प्रतिष्ठान**

३८ यू. ए., बंगलोरोड, जवाहरनगर

दिल्ली ११०००७

अथ

# यास्कीयनिरुक्तानुक्रमणी तत्रतावदुपोद्घातस्थविषयानुक्रमणी ।


| | पृष्ठाङ्काः |
|---|---|
| मङ्गलाचरणप्रतिज्ञे | १ |
| निघण्टुसमाख्याधिकरणम् | २ |
| अथपदचतुष्टयोद्देशकथनम् | ३ |
| नामाख्यातलक्षणाधिकरणम् | ४ |
| भाववाचकप्रदर्शनम् | ५ |
| सत्त्वोपदेशनिरूपणम् | ६ |
| भावोपदेशनिरूपणम् | ,, |
| शब्दानित्यत्वाक्षेपः | ,, |
| शब्दनित्यत्वस्थापनम् | ७ |
| शब्दप्रयोगस्यावश्यकतानि० | ८ |
| कर्म्मणि वेदमन्त्रस्यैवावश्यकतानि० | ९ |
| भावविकारप्रदर्शनम् | ,, |
| उपसर्गनिरूपणम् | ११ |
| निपातलक्षणकथनम् | १३ |
| नाम्नामाख्यातजत्वविचारः | ३२ |
| अथशास्त्रारम्भप्रयोजनाधिकारः | ३७ |
| मन्त्राणामनर्थकत्वाक्षेपः | ३८ |
| मन्त्राणामर्थवत्त्वसाधनम् | ४१ |
| अथद्वितीयंशास्त्रारम्भप्रयोजनम् | ४४ |
| पदविभागायार्थवत्त्वंमन्त्राणाम् | ,, |
| अथ तृतीयंशास्त्राऽरम्भप्रयोजनम् | ४६ |
| देवताज्ञानायार्थवत्त्वं मन्त्राणाम् | ,, |
| अथ चतुर्थंशास्त्रारम्भप्रयोजनम् | ४७ |
| अर्थज्ञानप्रशंसा | ४८ |
| वेदवेदाङ्गाम्नानम् | ५२ |
| अथनिर्वचनरीत्युपदेशः | ५३ |
| देशप्रसिद्ध्या शब्दरूढिः | ६० |
| अथतद्धितसमासनिर्वचनप्रकारः | ६१ |
| अथाधिकारिनिरूपणम् ... ६७ | ६७ |


इति ॥

# निरुक्तविवृतिः ।

## ( उपोद्घातः )

### प्रथमोऽध्यायः ।

श्रीमदाद्यापदाम्भोजद्वन्द्वं वन्देऽर्थसिद्धये ।
निरुक्तविवृतिं लघ्वीं ब्रुवे दुर्गमतं यथा ॥ १ ॥
श्रीमदाचार्यदुर्गोक्तिर्दुर्गमा विदुषामपि ।
इति व्युत्पित्समानानां प्रवृत्त्यै यतवानहम् ॥ २ ॥
दृष्ट्वैनां दुर्गवक्रोक्तिः स्फुटं विज्ञास्यते यथा ।
इति क्वचिद्विस्तरं मे क्षंस्यन्ति गुणगृध्नवः ॥ ३ ॥

अथ तत्रभवान्भगवान्यास्कमुनिरल्पायुषोऽल्पमेधसो जनाञ्जनिष्यमाणानक्षीणेन[1] तपोविज्ञानेनावेक्ष्य तदनुजिघृक्षया साक्षात्कृतधर्मभ्यो महर्षिभ्य उपदेशेन मन्त्रार्थमुपश्रुत्य श्रुतर्षिभिर्[2]व्याख्यार्थसामर्थ्यादभिधेयानुन्नीय मन्त्रार्थपरिज्ञानाय छन्दोभ्यः समाहृत्य समाहृत्य समाम्नातं पञ्चाध्यायी[3]शास्त्रसंग्रहभावेनैकस्मिन्नाम्नाये ग्रन्थीकृतं गवादिदेवपत्न्यन्तं वैदिकशब्दसमुदायं निघण्ट्वपरनामकं काण्डत्रय[4]विभागेन व्याचिख्यासुः प्रतिजानीते **समाम्नायः**

१. कुतोऽप्यप्रतिहतेन अनागतार्थदर्शिनेति यावत् ।

२. ऋषिशब्दार्थो वक्ष्यते ऋषिर्दर्शनादिति (नि० नै० २–३–२) तदर्थोपि वक्ष्यते (नि० नै० १–६–५) तत्र ये साक्षात्कृतधर्माणस्तेभ्य उपदेशेन श्रुत्वा पश्चाद्ये ऋषयो बभूवुस्ते ऋषिभ्यः श्रुतधर्मत्वाच्छ्रुतर्षय इत्युच्यन्ते ।

३. अथैतां पञ्चाध्यायीमभिप्रेत्य–"सैषा छन्दोऽवयवभूता छन्दोधर्मिण्येव यथाऽयथापन्नास्ता गौर्गोधर्मा इति" दुर्गवृत्त्या निघण्टोश्छन्दस्त्वमव्याहतमुक्तं भवति । यथा ( च ) अयथापन्ना अप्रकृतविपन्ना परं समान्यविपन्ना अस्ता यूथपरिभ्रष्टा गौर्गोधर्मा एव नहि तस्या यूथपरिभ्रष्टत्वेन गोत्वं नष्टम् । तथैव छन्दोभ्यः समाहृता एषा पञ्चाध्यायी छन्दएव । नह्यस्याः समाहरणत एव छन्दस्त्वं तिरोबभूवेति हि तद्भावः ॥

४. नैघण्टुकं, नैगमं, दैवतमित्येवम् । एतेषां लक्षणादिकमग्रे ( नि० नै० १-६-५-६ ) स्फुटीभविष्यति । उक्तं चोपक्रमणिकाभाष्यकृद्भिः–

"आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा ।
तृतीयं दैवतं चेति समाम्नायस्त्रिधा स्मृतः ॥
गौराद्यपारपर्यन्तमाद्यं नैघण्टुकं मतम् ।
जहाद्युल्बमृबीसान्तं नैगमं संप्रचक्षते ।
अग्न्यादिदेवपत्न्यन्तं दैवतं काण्ड[1]मुच्यते ॥" इति ॥

1. तत्राप्युक्तम्–"अग्न्यादिदेवीऊर्जाहुत्यन्तः क्षितिगतो गणः । वाय्वादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः ॥ सूर्यादिदेवपत्न्यन्ता द्युस्थानदेवता इति । गवादिदेवपत्न्यन्तं समाम्नायमधीयते" इति ॥

**समाम्नातः स व्याख्यातव्य[1] इति ।** अथास्य व्याख्यानम्[2] ॥

ननु सर्वत्र ग्रन्थादौ मङ्गलाचरणं शिष्टाचारानुमितिश्रुतिसंमतं तदत्र यास्कमुनिः किमिति नानुष्ठितवानिति चेन्न ।

"आशीर्वादनमस्कारवस्तुनिर्देशभेदतः ।
मङ्गलं त्रिविधं प्रोक्तं ग्रन्थादौ तत्सुखावहम्[1]"

इत्यभियुक्तोक्तरीत्या त्रिविधस्य तस्यैकतमरूपेणात्रापि सत्त्वान्नह्याशीर्वादनमस्काराभ्यामेव मङ्गलं भवतीति नियमः । येन हि ग्रन्थफलबीजभूतं वस्तु निर्दिश्यते तदपि मङ्गलम् । यथा महाकाव्येषु । प्रकृते च तदेव तृतीयविधमनुसंधेयं धीधनैरित्यलमत्यक्षरक्षरणेन ॥

१. अत्रेदमवधेयम्–शास्त्रारम्भे विषय–प्रयोजन–संबन्धा–ऽधिकारिणो निर्वाचनं प्रेक्षावत्प्रवृत्तिप्रयोजकं, प्रवृत्तौ हि तेषां बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनताज्ञानं जनक "मिदं मदिष्टसाधन" मिति । तथा कृतिसाध्यताज्ञानमपि "इदं मत्कृतिसाध्य"मिति । तयोश्च विषयविधयेदमिति विषयज्ञानं, इष्टमिति प्रयोजनज्ञानं, साधनं साध्यमित्येवं संबन्धज्ञानं, मदिति चाधिकारिज्ञानं जनकमिति जनकजनकत्वात्प्रयोजकमित्युच्यते । एतच्चतुष्टयानुगतरूपं तु ग्रन्था[2]ध्ययनप्रवृत्तिप्रयोजकज्ञानविषयत्वमिदमेव च ग्रन्थारम्भेऽनुबध्यमानरूपत्वादनुबन्धत्वम् । एतन्निर्वाचनमन्तरा शास्त्रमारभ्यमाणं न प्रेक्षावद्भिराद्रियेत[3] इति । तदेतदत्र व्याख्यातव्यनिघण्टुपदव्युत्पादनमुखेन प्रथमाध्यायचतुर्थपादान्तेन ग्रन्थसन्दर्भेण विषयलक्षणमुच्यते । "अथापीदमन्तरेणे" (नि० १–५–१) त्यादिना तु शास्त्रारम्भप्रयोजनकथनमारप्स्यते । अधिकारिलक्षणं तु "नावैयाकरणाये" ( नि० २–१–६ )–त्यादिना वक्ष्यते । अनयोः ( प्रयोजनाधिकारिलक्षणयोः ) मध्ये यत्किंचिद्वक्ष्यते तत्प्रयोजनाङ्गतयैवावस्थास्यते । संबन्धस्तु शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावः । विषयप्रयोजनयोश्च साध्यसाधनभाव इत्येवमनुक्तोऽप्यभ्यूहितुं शक्यत इति स इह मुखतो नोक्त इति ॥

२. व्याख्यानं च–

"पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजनम् ।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं स्मृतम् ॥"

इत्युक्तलक्षणं षट्प्रकारकम् ॥

1. तच्छुभावहमित्यपि पाठः क्वचित् ॥

2. ग्रन्थः शास्त्रं तदेकदेशो वा प्रकरणाख्यापकः । अलौकिकैकप्रयोजनोद्देशेन प्रवृत्तवाक्यसमुदायो हि ग्रन्थः ॥

3. तथाचोक्तम्–"विना विषयसंबन्धौ तथैवार्थाधिकारिणौ ।
अव्याख्येयो भवेद्ग्रन्थः स्याद्ग्रन्थे तच्चतुष्टयम् ॥ १ ॥" इति ॥
अत्रोपपत्तिमाह–"सिद्धार्थं सिद्धसंबन्धं श्रोतुं श्रोता प्रवर्तते ।